## ॐ श्रीपरमात्मने नमः । अथ चतुर्थोऽध्यायः । ज्ञानकर्मसन्न्यासयोगः ।

श्रीभगवानुवाच ।
इमं विवस्वते योगम् प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥

एवं परम्पराप्राप्तम् इमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ॥ २ ॥

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ॥ ३ ॥

अर्जुन उवाच ।
अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयाम् त्वमादौ प्रोक्तवानिति ॥ ४ ॥

श्रीभगवानुवाच ।
बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ॥ ५ ॥

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥ ६ ॥

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥ ७ ॥

परित्राणाय साधूनाम् विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ८ ॥

जन्म कर्म च मे दिव्यम् एवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥ ९ ॥

वीतरागभयक्रोधाः मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ १० ॥

ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ११ ॥

काङ्क्षन्तः कर्मणां सिद्धिम् यजन्त इह देवताः ।
क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥ १२ ॥

चातुर्वर्ण्यं मया सृष्टम् गुणकर्मविभागशः ।
तस्य कर्तारमपि माम् विद्ध्यकर्तारमव्ययम् ॥ १३ ॥

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वम् पूर्वैः पूर्वतरं कृतम् ॥ १५ ॥

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

कर्मणो ह्यपि बोद्धव्यम् बोद्धव्यं च विकर्मणः ।
अकर्मणश्च बोद्धव्यम् गहना कर्मणो गतिः ॥ १७ ॥

कर्मण्यकर्म यः पश्येत् अकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ १८ ॥

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणम् तमाहुः पण्डितं बुधाः ॥ १९ ॥

त्यक्त्वा कर्मफलासङ्गम् नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥ २० ॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ २१ ॥

<table>
<tr><td>यदृच्छालाभसन्तुष्टः द्वन्द्वातीतो विमत्सरः।<br>समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥२२॥</td><td>श्रेयान्द्रव्यमयाद्यज्ञात् ज्ञानयज्ञः परन्तप।<br>सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते॥३३॥</td></tr>
<tr><td>गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः।<br>यज्ञायाचरतः कर्म समग्रं प्रविलीयते॥२३॥</td><td>तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।<br>उपदेक्ष्यन्ति ते ज्ञानम् ज्ञानिनस्तत्त्वदर्शिनः॥३४॥</td></tr>
<tr><td>ब्रह्मार्पणं ब्रह्म हविः ब्रह्माग्नौ ब्रह्मणा हुतम्।<br>ब्रह्मैव तेन गन्तव्यम् ब्रह्मकर्मसमाधिना॥२४॥</td><td>यज्ज्ञात्वा न पुनर्मोहम् एवं यास्यसि पाण्डव।<br>येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि॥३५॥</td></tr>
<tr><td>दैवमेवापरे यज्ञम् योगिनः पर्युपासते।<br>ब्रह्माग्नावपरे यज्ञम् यज्ञेनैवोपजुह्वति॥२५॥</td><td>अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः।<br>सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि॥३६॥</td></tr>
<tr><td>श्रोत्रादीनीन्द्रियाण्यन्ये संयमाग्निषु जुह्वति।<br>शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वति॥२६॥</td><td>यथैधांसि समिद्धोऽग्निः भस्मसात्कुरुतेऽर्जुन।<br>ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥</td></tr>
<tr><td>सर्वाणीन्द्रियकर्माणि प्राणकर्माणि चापरे।<br>आत्मसंयमयोगाग्नौ जुह्वति ज्ञानदीपिते॥२७॥</td><td>न हि ज्ञानेन सदृशम् पवित्रमिह विद्यते।<br>तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥३८॥</td></tr>
<tr><td>द्रव्ययज्ञास्तपोयज्ञाः योगयज्ञास्तथापरे।<br>स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः॥२८॥</td><td>श्रद्धावाँल्लभते ज्ञानम् तत्परः संयतेन्द्रियः।<br>ज्ञानं लब्ध्वा परां शान्तिम् अचिरेणाधिगच्छति॥३९॥</td></tr>
<tr><td>अपाने जुह्वति प्राणम् प्राणेऽपानं तथापरे।<br>प्राणापानगती रुद्ध्वा प्राणायामपरायणाः॥२९॥</td><td>अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति।<br>नायं लोकोऽस्ति न परः न सुखं संशयात्मनः॥४०॥</td></tr>
<tr><td>अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति।<br>सर्वेऽप्येते यज्ञविदः यज्ञक्षपितकल्मषाः॥३०॥</td><td>योगसन्न्यस्तकर्माणम् ज्ञानसञ्छिन्नसंशयम्।<br>आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय॥४१॥</td></tr>
<tr><td>यज्ञशिष्टामृतभुजः यान्ति ब्रह्म सनातनम्।<br>नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम॥३१॥</td><td rowspan="2">तस्मादज्ञानसम्भूतम् हृत्स्थं ज्ञानासिनात्मनः।<br>छित्त्वैनं संशयं योगम् आतिष्ठोत्तिष्ठ भारत॥४२॥</td></tr>
<tr><td>एवं बहुविधा यज्ञाः वितता ब्रह्मणो मुखे।<br>कर्मजान्विद्धि तान्सर्वान् एवं ज्ञात्वा विमोक्ष्यसे॥३२॥</td></tr>
<tr><td colspan="2">ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे<br>ज्ञानकर्मसन्न्यासयोगो नाम चतुर्थोऽध्यायः॥<br>श्रीकृष्णार्पणमस्तु॥</td></tr>
</table>